vyoma-saṃskṛta-pāṭhaśālā

॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥

Learn Sanskrit From Home, Teach Sanskrit From Home.

Srimad-Bhagavadgeetha & Sanskrit

|| *Dharmakshetre kurukshetre* ||

Current Index : Introduction to Bhagavad geetha – 10th Nov 2011

Vyoma Samskrta Paatashaala is an e-learning initiative of Vyoma Linguistic Labs Foundation – which is a non-profit section-25 linguistic technology company

http://www.sanskritfromhome.in/

http://www.vyomalabs.in/

vyóma

॥ वाचं धेनुमुपासीत ॥

vyoma-saṃskṛta-pāṭhaśālā

॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥

ध्यान श्लोका:

गुरुरेव गतिर्गुरुमेव भजे गुरुणैव सहास्मि नमो गुरवे ।
न गुरोः परमं शिशुरस्मि गुरोः मतिरस्ति गुरौ मम पाहि गुरो ॥

पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीं
अम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥

नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥

Shloka

(in devanagari)

सञ्जय उवाच -
तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ २.१ ॥

(in English)

sañjaya uvāca
-taṁ tathā kṛpayaviṣṭamaśrupūrṇākulēkṣaṇam |
viṣīdantamidaṁ vākyamuvāca madhusūdanaḥ || 2.1 ||

Index Ref

2nd chapter,1 of 72

पदच्छेदः

सञ्जयः उवाच - तम्, तथा,कृपया,आविष्टम्,अश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तम्, इदम्, वाक्यम्, उवाच, मधुसूदनः ॥

अन्वयार्थ:

(Prose Order with meaning & introduction to the word)

मधुसूदनः	श्रीकृष्णः,अच्युतः	Madhusudana	अ.पुं.प्र.एक.
तथा	तेन प्रकारेण	thus	अव्ययम्
कृपया	दयया,करुणया	with pity	आ.स्त्री.तृ.एक.
आविष्टम्	आक्रान्तम्,आवृतम्	overwhelmed	अ.पुं.द्वि.एक.
अश्रुपूर्णाकुलेक्षणम्	बाष्पपूर्णनेत्रम्	eyes dimmed with tears	अ.पुं.द्वि.एक.
विषीदन्तम्	दुःखितम्	sorrowing	विषीदत् त.पुं.द्वि.एक.
तम्	तम् (अर्जुनम्)	him (Arjuna)	तद् - द.सर्व.पुं.द्वि.एक.
इदम्	एतत्	this	इदम् - म.सर्व.नपुं.द्वि.एक.
वाक्यम्	वचनम्,उक्तिम्	word	अ.नपुं.द्वि.एक.
उवाच	अवदत्,अकथयत्	spoke	वच्-पर.कर्तरि लिट् प्रपु.एक.

विशेषांशा: / Special Notes

१ Brief description of अर्जुन's state of mind - कृपयाविष्टम् ; अश्रुपूर्णाकुलेक्षणम् ; विषीदन्तम्

२ मधुसूदन: - slayer of असुर: by name मधु .

similar to him are the sons of धृतराष्ट्र: (and His avataara karya itself is दुष्टशिक्षणम्)

३ अश्रुपूर्णाकुलेक्षणम् - Hence could not see clearly – what is right and what is wrong

४ वाक्यम् - these are the words of Krishna which are profound and which are going to attack the weakness & sorrow in the mind of अर्जुन:

Shloka

(in devanagari)

श्रीभगवानुवाच -
कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २.२ ॥

(in English)

śrībhagavānuvāca -kutastvā kaśmalamidaṁ viṣamē samupasthitam |
anāryajuṣṭamasvargyamakīrtikaramarjuna || 2.2 ||

Index Ref

2nd chapter,2 of 72

पदच्छेदः

श्रीभगवान् उवाच –
कुतः,त्वा,कश्मलम्,इदम्,विषमे,समुपस्थितम् ।
अनार्यजुष्टम्,अस्वर्ग्यम्, अकीर्तिकरम्,अर्जुन ॥

अन्वयार्थ:

(Prose Order with meaning & introduction to the word)

अर्जुन	हे अर्जुन !, हे धनञ्जय	O Arjuna	अ.पुं.सम्बो.एक.
विषमे	विपत्तिकाले, कष्टकाले	in (such a) crisis	अ.पुं.स.एक.
अनार्यजुष्टम्	असाधुसेवितम्, दुष्टैः सेवितम्	un-Arya-like (unworthy of a religious man)	अ.नपुं.प्र.एक.
अस्वर्ग्यम्	स्वर्गायोग्यम्, स्वर्गानर्हम्	contrary to the attainment of heaven	अ.नपुं.प्र.एक.
अकीर्तिकरम्	अयशस्करम्	disgraceful	अ.नपुं.प्र.एक.
इदम्	एतत्, युद्धात्	this	म.सर्व.नपुं.प्र.एक.
कश्मलम्	पराङ्मुखत्वम् चित्तकालुष्यम्, मालिन्यम्,शिष्टगर्हितम्	dejection	अ.नपुं.प्र.एक.
कुतः	कस्मात् कारणात्,इति हेतोः	whence	अव्ययम्
त्वा	त्वाम्,क्षत्रियप्रवरम्	upon thee	युष्मद् - द.सर्व.पुं.द्वि.एक.
समपस्थितम	समागतम,प्राप्तम	comes	अ.नपं.प्र.एक.

विशेषांशा: / Special Notes

१ कश्मलम् - would not lead to any of the 4 पुरुषार्थाs

२ अर्जुन: = white, bright, pure in mind ; shining

३ अनार्यजुष्टम् - Thoughtful, great people – मोक्ष people

४ अस्वर्ग्यम् - Virtuous – स्वर्ग people

५ अकीर्तिकरम् - Ordinary – Name & fame people

Shloka

(in devanagari)

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्वक्त्वोत्तिष्ठ परन्तप ॥ २.३ ॥

(in English)

klaibyaṁ mā sma gamaḥ pārtha naitattvayyupapadyatē |
kṣudraṁ hṛdayadaurbalyaṁ tvaktvōttiṣṭha parantapa || 2.3 ||

Index Ref

2nd chapter,3 of 72

पदच्छेदः

क्लैब्यम्,मा,स्म,गमः,पार्थ,न,एतत्,त्वयि,उपपद्यते ।
क्षुद्रम्,हृदयदौर्बल्यम्,त्यक्त्वा,उत्तिष्ठ, परन्तप ॥

अन्वयार्थ:

(Prose Order with meaning & introduction to the word)

पार्थ	हे अर्जन !, पृथातनय,गुडाकेश	Son of Prtha	अ.पुं.सम्बो.एक.
क्लैब्यम्	नपुंसकत्वम्, कातर्यम्,निर्वीर्यत्वम्	unmanliness	अ.नपुं.द्वि.एक.
मा स्म गमः	मा प्राप्नुहि	do not get	अव्ययम्
त्वयि	भवति	in thee	युष्मद् - द.सर्व.स.एक.
एतत्	इदम्,	it	एतद् - द.सर्व.नपुं.प्र.एक.
न उपपद्यते	युद्धात् पलायम् न युज्यते	ill becomes	अव्ययम् / उप + पद - आत्म.कर्तरि लट्. प्रपु. एक.
परन्तप	शत्रुपीडक ! (अर्जुन)	O scorcher of foes	अ.पुं.सम्बो.एक.
क्षुद्रम्	तुच्छम्	mean	अ.नपुं.द्वि.एक.
हृदयदौर्बल्यम्	चित्तवैक्लव्यम्	faint-heartedness	अ.नपुं.द्वि.एक.
त्यक्त्वा	विसृज्य	casting off	क्त्वान्तम् अव्ययम्
उत्तिष्ठ	सन्नद्धो भव, सिद्धो भव	arise	उद् + स्था - पर.कर्तरि.लोट्.मपु.एक.

विशेषांशा: / Special Notes

१ पार्थ: - कुन्ती 's letter to अर्जुन

(this is the time for which mother of warrior class gives birth to her sons)

- more personal & closer/ well wisher - used 38 times ; next is कौन्तेय: - 24 times

२ परन्तप – scorcherer of foes – reminding

३ क्षुद्रम् - 2 meanings – a) It will make you तुच्छम् b) It is easy to give up this feeling

४ can be linked to Shlokas 31 to 38 of this chapter

Shloka

(in devanagari)

अर्जुन उवाच -
कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ २.४ ॥

(in English)

arjuna uvāca -
kathaṁ bhīṣmamahaṁ saṅkhyē drōṇaṁ ca madhusūdana |
iṣubhiḥ pratiyōtsyāmi pūjārhāvarisūdana || 2.4 ||

Index Ref

2nd chapter,4 of 72

पदच्छेदः

अर्जुनः उवाच - कथम्, भीष्मम्, अहम्, सङ्ख्ये,द्रोणम्,च,मधुसूदन ।
इषुभिः, प्रतियोत्स्यामि,पूजार्हौ, अरिसूदन ॥

अन्वयार्थ: (Prose Order with meaning & introduction to the word)			
मधुसूदन	हे कृष्ण !	O slayer of Madhu	अ.पुं.सम्बो.एक.
अहम्	अहम्	I	अस्मद् - द.सर्व.प्र.एक.
सङ्ख्ये	युद्धे,रणे	in battle	अ.नपुं.स.एक.
कथम्	केन प्रकारेण	how	अव्ययम्
पूजार्हौ	सम्मान्यौ, कुसुमादिभिरर्चन योग्यौ	worthy to be worshipped	अ.पुं.द्वि.द्विव.
भीष्मं द्रोणं च	भीष्मं द्रोणं च	Bhisma and Drona	अ.पुं.द्वि.एक.
इषुभिः	बाणैः,सायकैः	with arrows	उ.पुं.तृ.बहु.
प्रतियोत्स्यामि	सम्प्रहरिष्यामि	shall fight against	प्रति + युध् - पर.लृट्.उपु.एक.
अरिसूदन	हे शत्रुभञ्जन ! शत्रुनिर्दलन	O destroyer of foes	अ.पुं.सम्बो.एक.

अर्थः मधुसूदन ! अहं सङ्ख्ये कथम् इषुभिः पूजार्हौ भीष्मं द्रोणं च प्रतियोत्स्यामि ? अरिसूदन !

Meaning Arjuna said: But how can I, in battle, O slayer of Madhu, fight with arrows against Bhisma and Drona, who are rather worthy to be worshipped, O destroyer of foes !

तात्पर्यं हे मधुसूदन ! पितामहः भीष्मः आचार्यः द्रोणश्च मम अत्यन्तं पूजार्हौ । अहं युद्धे कथं तौ प्रति बाणप्रयोगं करवाणि ?

व्याकरणम्

सन्धिः	पूजार्हावरिसूदन	- पूजार्हौ	+ अरिसूदन	यान्तवान्तादेशसन्धिः
समासः	पूजार्हौ	-पुजाम्	+ अर्हौ	- द्वितीयातत्पुरुषः ।
कृदन्तः	अर्हः	- अर्ह्	+ अच् (कर्तरि)	

विशेषांशा: / Special Notes

१ मधुसूदन / अरिसूदन – always killed bad people ; not righteous like भीष्म: & द्रोण: - they are not demons like मधु or enemies

२ कथम् - no क्लीबत्वम् – out of respect only

३ भीष्म :– used to call as पित: ; used to tell am your पितामह:

द्रोण: - imparted knowledge greater than to son ; ब्रह्मास्त्रनियन्त्रणम्

४ इषुभि: - they are so respectable – ताभ्यां सः (भीष्म,पुनःद्रोणः) वाचापि योद्धुमशक्यं किमुत बाणैः इति भावः

Shloka

(in devanagari)

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥ २.५ ॥

(in English)

gurūnahatvā hi mahānubhāvān śrēyō bhōktuṁ bhaikṣyamapīha lōkē |
hatvārthakāmāṁstu gurūnihaiva bhuñjīya bhōgānrudhirapradigdhān || 2.5 ||

Index Ref

2nd chapter,5 of 72

पदच्छेदः

गुरून्, अहत्वा,हि,महानुभावान्,श्रेयः,भोक्तुम्,भैक्ष्यम्,अपि,इह,लोके ।
हत्वा,अर्थकामान्, तु, गुरून्, इह,एव,भुञ्जीय,भोगान्, रुधिरप्रदिग्धान् ॥

अन्वयार्थ: (Prose Order with meaning & introduction to the word)

महानुभावान्	महाशयान्	great-souled	अ.पुं.द्वि.बहु.
गुरून्	आचार्यान्,उपाध्यायान्	masters	उ.पुं.द्वि.बहु.
अहत्वा	अविनाशय (स्थितस्य मम)	instead of slaying	क्त्वान्तम् अव्ययम्
भैक्ष्यम्	भिक्षाम्	bread of beggary	अ.नपुं.द्वि.एक.
भोक्तुम्	खादितुम्,अनुभवितुम्	to eat	तुमुन्नन्तम् अव्ययम्
इह लोके	अस्मिन् लोके	in this life	अव्ययम् / अ.पुं.स.एक.
श्रेयः	साधु,उचितम्,प्रशस्तम्	better	श्रेयस् - स.नपुं.प्र.एक.
हत्वा	विनाश्य,मारयित्वा	killing	क्त्वान्तम् अव्ययम्
इह एव	अस्मिन् प्रपञ्चे एव	in this world even	अव्ययम्
रुधिरप्रदिग्धान्	रक्तमिश्रितान्	stained with blood	अ.पुं.द्वि.बहु.
अर्थकामान्	अर्थकामरूपान्	wealth and desires	अ.पुं.द्वि.बहु.
भोगान्	वस्तुविशेषान्	enjoyments	अ.पुं.द्वि.बहु.
भुञ्जीय	आस्वादयेयम्,अष्नुयाम्	enjoy	भुज् - आत्म. वि.लिङ्.उपु.एक.

अर्थः महानुभावान् गुरून् अहत्वा (स्थितस्य मम) भैक्ष्यं भोक्तुम् इह लोके श्रेयः । गुरून् हत्वा इह एव रुधिरप्रदिग्धान् अर्थकामान् भोगान् भुञ्जीय ?

Meaning Surely it would be better even to eat the bread of beggary in this life than to slay these great-souled masters. But if I kill them, even in this world, all my enjoyment of wealth and desires will be stained with blood.

तात्पर्यं एतान् महानुभावान् गुरून् भीष्मद्रोणादीन् अहत्वा भिक्षायाचनेन जीवनमपि वरम् । किन्तु एतेषां हननेन प्राप्यमाणाः ये भोगाः रक्तलिप्ताः भविष्यन्ति तेषाम् उपभोगः सर्वथा नोचितः ।

व्याकरणम्

सन्धिः	श्रेयो भोक्तुम्	- श्रेयः + भोक्तुम्	विसर्गसन्धिः (सकारः) उकारः गुणः
	अपीह	- अपि + इह	सवर्णदीर्घसन्धिः
समासः	महानुभावान्	- महान् अनुभावः येषां ते, तान् - बहुव्रीहिः ।	
कृदन्तः	हत्वा	- दृश्यताम् - १.३१	
	भोक्तुम्	- भुज् + तुमुन् ।	
तद्धितान्तः	श्रेयः	- प्रशस्त + ईयसुन् (अतिशये) प्रशस्तशब्दस्य श्र इति आदेशः ।	
	भैक्ष्यम्	- भिक्षा + ष्यञ् (स्वार्थे)	

विशेषांशा: / Special Notes

१ गुरु : - गु = अन्धकार: ; रु = तन्निरोधकः
गुरुत्वात् ; योग्यत्वात्
द्रोण:, कृप:, बाल्हिक:, भीष्म:, etc

२ अपि – for a क्षत्रिय – alms prohibited ; but now its better than killing, which appears more sinful

३ अर्थकामान् – adjective for what/ who ?

Shloka

(in devanagari)

न चैतद्विद्मः कतरन्नो गरीयो युद्धा जयेम यदि वा नो जयेयुः ।
यावेन हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ २.६॥

(in English)

na caitadvidmaḥ kataranno garīyō yuddhā jayēma yadi vā nō jayēyuḥ |
yāvēna hatvā na jijīviṣāmastēऽvasthitāḥ pramukhē dhārtarāṣṭrāḥ || 2.3 ||

Index Ref

2nd chapter,6 of 72

पदच्छेदः

न,च,एतत्,विद्मः, कतरत्, नः,गरीयः,यत्,वा,जयेम,यदि,वा,नः,जयेयुः ।
यान्,एव,हत्वा,न,जिजीविषामः,ते,अवस्थिताः,प्रमुखे,धार्तराष्ट्राः ॥

अन्वयार्थः (Prose Order with meaning & introduction to the word)	न च	न च	not and	अव्ययम्
	एतत्	इदम्	this	द.सर्व.नपुं.द्वि.एक.
	विद्मः	जानीमः	know	विद् - पर.कर्तरि लट्.उपु.बहु.
	कतरत्	किम्	which of the two	कतरत् - त.नपुं.प्र.एक.
	नः	अस्माकम्	for us	अस्मद् - द.सर्व.ष.बहु.
	गरीयः	श्रेयः,श्रेष्ठम्,अधिकतरम्	better	गरीयस् - स.नपुं.प्र.एक.
	यद् वा	यदि वा	whether	यद् - द.सर्व.नपुं.प्र.एक. / अव्ययम्
	जयेम	जयं प्राप्नुयाम्,जेष्यामः	we should conquer	जि - पर.कर्तरि वि.लिङ्.उपु.बहु.
	यदि वा	अथ वा	or that	यद् - द.सर्व.नपुं.प्र.एक. / अव्ययम्
	नः	अस्मान्	us	अस्मद् - द.सर्व.ष.बहु.
	जयेयुः	(ते) पराजयेरन्, ,ते जेष्यन्ति यान् सुताः	they should conquer	जि - पर.कर्तरि वि.लिङ्.प्रपु.बहु.
	प्रमुखे	सम्मुखे	in front	अ.पुं.स.एक.
	अवस्थिताः	उपस्थिताः	stand	अ.पुं.प्र.बहु.

Chapter 2, shloka 6 …contd

अर्थ: यान् हत्वा न जिजीविषामः ते एव धार्तराष्ट्राः प्रमुखे अवस्थिताः (तस्मात्) यद् वा जयेम यदि वा नो जयेयुः (अनयोः) कतरत् नः गरीयः (इति) एतत् न विद्मः ।

Meaning And indeed I can scarcely tell which will be better, that we should conquer them, or that they should conquer us. The very sons of Dhrtarastra- after slaying whom we should not care to live - stand facing us.

तात्पर्यं यान् हत्वा वयं जीवितुं न शक्नुमः तादृशाः दुर्योधनादयः समरे उपस्थिताः सन्ति । युद्धे अन्यस्य हननम् अन्यस्य च जीवनम् इत्येतत् अवश्यम्भावि । तस्मात् यदि वयं जीवनम् इच्छामः तर्हि अवश्यं तेषां मरणं काङ्क्षणीयम् । अथ वयं मरणम् इच्छामः ते कामं जीवन्ति । किन्तु समरशूराणाम् अस्माकम् एतत् अवमानं भवति । तस्मात् अनयोः किम् अस्माकम् उचितमिति न जानिमः ।

व्याकरणम्				
सन्धिः	चैतत्	- च	+ एतत्	वृद्धिसन्धिः
समासः	एतद्विद्मः	- एतत्	विद्मः	जश्त्वसन्धिः
	कतरन्नः	- कतरत्	+ नः	अनुनासिकसन्धिः
	नो गरीयो यद्वा	- नः	+ गरीयः	विसर्गसन्धिः (सकारः) उकारः, गुणः
		- गरीयः	+यत्	विसर्गसन्धिः (सकारः) उकारः, गुणः
		- यत्	+ वा	जश्त्वसन्धिः
	नो जयेयुः	- नः	+ जयेयुः	विसर्गसन्धिः (सकारः) उकारः, गुणः
	जिजीविषामस्ते	- जिजीविषामः	+ ते	विसर्गसन्धिः (सकारः)
	तेऽवस्थिताः	- ते	+ अवस्थिताः	पूर्वरूपसन्धिः
कृदन्तः	अवस्थिताः दृश्यताम् - १.११			
तद्धितान्तः	कतरत् - किम् + डतरच् (स्वार्थे) ।			
	गरीयः - गुरु + ईयसुन् (अतिशये) । अतिशयेन गुरुः इत्यर्थः ।			
	धार्तराष्ट्राः - दृश्यताम् - १.१९			

विशेषांशा: / Special Notes

१

धन्यवादाः

For any queries/ feedback please feel free to contact us at

Vyoma Linguistic Labs Foundation

A non-profit section-25 linguistic technology company

Ph: 09686674545 (Between 10 AM and 5 PM on weekdays)

Email: sanskritfromhome@vyomalabs.in

http://www.sanskritfromhome.in/

http://www.vyomalabs.in/